**दिनाङ्क :-21.05.2026**
**प्रात: - 06:55**
**संस्कृत वार्ता:**

## अथ वार्ता:

### प्रधानमन्त्री-इटली

प्रधानमन्त्री श्री नरेन्द्र मोदी पञ्चराष्ट्रयात्रायाः पञ्चमम् अन्तिमं च चरणं सफलतया सम्पाद्य इटलीदेशात् नवदिल्लीं प्रत्यागतवान्। ह्यः भारत-इटली-देशयोः मध्ये विशेष-रणनैतिक-सहयोगिता-रूपेण स्वसम्बन्धस्य उन्नयनस्य घोषणा अभवत्। कृषिः, महत्त्वपूर्णखनिजाः, आयुर्वेदः, विज्ञानं, तन्त्रज्ञानम् - इत्यादिषु क्षेत्रेषु द्वयोः देशयोः मध्ये अनेकाः सन्धयः हस्ताक्षरिताः । कर-अपराधानां, धनशोधनस्य, आतङ्क-वित्तपोषणस्य च निवारणार्थम् अपि राष्ट्रद्वयेन ज्ञापनपत्रेषु हस्ताक्षरं कृतम् । इटलीदेशस्य प्रधानमन्त्रिणा जॉर्जिया मेलोनी इत्यनया सह, रोमनगरे, संयुक्त-वक्तव्ये प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना उक्तं यत्, उभौ देशौ नौका-वहनक्षेत्रेषु, नौका-पत्तनानाम् आधुनिकीकरणे, रसदक्षेत्रे, नील-अर्थव्यवस्थायां च मिलित्वा कार्यं करिष्यतः।

इटली-देशस्य प्रधानमन्त्री जार्जिया मेलोनी इत्येषा अवदत् यत् भारत-इटली-देशयोः सम्बन्धः विशेष-सामरिक सहभागित्वरूपेण वर्धमानः अस्ति, अपि च उभौ देशौ उन्नतनिर्माणस्य, आधारभूतसंरचनायाः, ऊर्जायाः, अर्थव्यवस्थायाः, रक्षायाः च क्षेत्रेषु परिश्रमेण कार्यं कुर्वन्तौ स्तः।

### भारतम्-इटली

भारतम् इटली च, सांस्कृतिक-विनिमयं प्रवर्धयितुं, प्राचीनसभ्यतानां मध्ये संवादं सुदृढं कर्तुं च, द्विसहस्राब्दस्य सप्तविंशतितमं वर्षं संस्कृतेः पर्यटनस्य च वर्षरूपेण आचरिष्यतः। इटलीदेशस्य प्रधानमन्त्री जोर्जिया मेलोनी इत्यनया उक्तं यत्, एषः उपक्रमः द्वयोः देशयोः मध्ये परस्परं अवगमनं गभीरं कर्तुं, सांस्कृतिक-कूटनीतिं च अधिकं सुदृढं कर्तुं साहाय्यं करिष्यति । सा अवदत्, देशयोः मध्ये सुदृढतर-सम्बन्धाः न केवलं राजनैतिक-आर्थिक-सम्बन्धैः अपितु जनानां समाजानां च मध्ये सम्पर्कस्य माध्यमेन अपि मापिताः भवन्ति।

### प्रधानमन्त्री

प्रधानमन्त्रिणे श्रीनरेन्द्रमोदिने, इटलीदेशस्य रोमनगरे, खाद्यकृषिसंघटनेन प्रतिष्ठितं एग्रीकोला-पदकं प्रदत्तम् । पुरस्कारं प्राप्य श्रीमोदी, भारतस्य कोटि-कोटि-कृषकाणां, पशुपालकानां, मत्स्यपालकानां, कृषिवैज्ञानिकानां, श्रमिकाणां च कृते एतत् सम्मानं समर्पितवान्। पदकमिदं खाद्यकृषिसंघटनस्य महानिदेशकः क्यू-डोंग्यू इत्यनेन प्रदत्तम्। गृहमन्त्री अमितशाह, वित्तमन्त्री निर्मला सीतारामन् तथा वाणिज्य-उद्योगमन्त्री पीयूषगोयलः प्रधानमन्त्रिणः कृते एग्रीकोला-पदक-प्राप्त्यर्थम् अभिनन्दनं कृतवन्तः। गृहमन्त्री अमित-शाहः अवदत् यत् भारतं कृषिक्षेत्रे वैश्विकनेतृत्वेन उद्भूतम् अस्ति तथा च देशस्य कृषिप्रतिरूपं समग्रविश्वस्य कृते एकं मानदण्डं स्थापयति।

### फाल्टा-पश्चिमबङ्गाल

पश्चिमबङ्गालराज्ये दक्षिण-चतुर्विंशतिः-परगण-मण्डलस्य फाल्टा विधानसभा-क्षेत्रे पुनर्मतदानम् अधुना सप्तवादनतः आरभ्यते यद्धि सायं षड् वादने समाप्तं भविष्यति। अहत्य षट् प्रत्याशिनः स्वभाग्यस्य परीक्षां कुर्वन्ति, येषु द्वौ निर्दलीयौ अपि स्तः। तृणमूल-काङ्ग्रेस-दलस्य प्रत्याशी जहांगीरखानः निर्वाचनं न स्पर्धिष्यति इति घोषितवान् । परन्तु प्रत्याशीनां नाम प्रतिस्वीकृतेः, समयसीमा, पूर्वमेव व्यतीता इति कारणेन तस्य नाम औपचारिकरूपेण मतपत्रे एव तिष्ठति। भाजपादलस्य प्रत्याशी देबांग्शु पाण्डा अस्ति। काङ्ग्रेस-दलेन अब्दुल-रज्जाक-मोला, सी.पी.आई.एम-दलेन सम्भूनाथ-कुर्मी-च स्थितौ स्तः।

**ऋतु-विभागः**

भारतीय ऋतु-विज्ञान-विभागेन रक्तवर्णीय संचेतना प्रख्यापिता यत् उत्तरप्रदेशस्य, मध्यप्रदेशस्य, विदर्भस्य च भागेषु आगामिदिनत्रयं यावत्ताप-तरङ्गतः तीव्रताप-तरङ्गस्य स्थितिः भवति । विभागेन अनुमानितम् यत् हरियाणा, चण्डीगढ, दिल्ली, पञ्जाब, बिहार, छत्तीसगढ, तटीय आन्ध्रप्रदेश, हिमाचलप्रदेश, ओडिशा, राजस्थान, तेलंगाना, उत्तराखण्डे च एतादृशाः एव परिस्थितयः सम्भवन्ति ।

**आईपीएल**

आई.पी.एल. इति विंशतिम्-प्रतिविंशतिः क्रिकेट्-लीग-प्रतिस्पर्धायां, गतरात्रौ, कोलकाता नाईट राईडर्स् दलेन, मुम्बई इण्डियन्स् दलं चतुस्तोभकैः पराजितम् । अद्य सायं सार्धसप्तवादने, गुजरात् टाइटन्स् दलं, अहम्मदाबादनगरे, चेन्नई सूपर् किंग्स् दलं, सम्मुखीकरिष्यति ।

**॥इति वार्ता:॥**